सम्+अव+सम्यग्दर्शने । "नृपोपमोऽयं समवेक्षते सभाम्" भा०वि०२१८श्लो०। "यदि दृष्टं बलं सर्व्वं वयञ्च समवेक्षिताः" भा०आ०२५अ० । सम्यक्पर्य्यालोचने च "सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा" मनुः ।

आ+सम्यग्दर्शने ।"समयश्चैवेक्ष्य पाञ्चालीम्"भा०स०२३८०।

उद्+ऊर्द्ध्वदर्शने । "सहस्ररश्मिना साक्षात् सप्रणाममुदीक्षिताः" कुमा० । अपेक्षायाञ्च "त्रीणि वर्षाण्युदीक्षेत कुमार्य्यृतुमती सती" मनुः ।

उप+हेयत्वज्ञानेन परित्यागे "उपेक्षया स्वत्वहानिः" दाय-भा०टी० "ये मां विप्रकृतां क्षुद्रैरुपेक्षध्वं विशोकवत्"भा० व०११अ० प्रतिचिकीर्षाभावे"उपेक्षते यः श्लथवल्लिनीर्जटाः" कुमा० "नोपपेक्षेत क्षणमपि राजा साहसिकं नरम्" मनुः अपर्य्यालोचने अनुसन्धानाभावे च"गूढेन चरता तत्त्वमुपेक्षितमिदं मया"रामा० ।

सम+उप+सम्यगुपेक्षायाम् । "शत्रुपक्षं समाधातुं योमोहात् समुपेक्षते" भा०स०१०६० श्लो०।

निस्+निर्+निःशेषेण दर्शने निश्चयार्थं दर्शने च ।"यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्"गीता ।

परि+तत्त्वानुसन्धाने प्रमाणाद्युपन्यासेन वस्तुतत्त्वावधारणे च "परीक्ष्य लोकान् कर्म्मचितान्"श्रुतिः। न्यायसूत्रवृत्त्यादौ प्रमाणप्रमेयादि परीक्षा बहुशो दर्शिता । सम्यक्विवेचने च ।"नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः। सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते" मनुः । लक्षणादिमत्त्वेन ज्ञाने च अश्वविद्याविदश्चैव सूता विप्राश्च तद्विदः । मेध्यमश्वं परीक्षन्तां तव यज्ञार्थसिद्धये" भा०आश्व०३० २७ श्लो०।"यत्नात् परीक्षितः पुंस्त्वे"या०स्मृ०। "सर्व्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः" हितो०भक्तिमत्त्वादिना ज्ञाने च ।"मायां मयोद्भाव्य परीक्षितोऽसि"रघुः । विवादे सत्यत्वासत्यत्वादिसंशयनिरासाय स्वपक्षप्रामाण्यव्यवस्थापनाय शपथकरणे तुलापरीक्षादि । परीक्षाशब्दे विवृतिः ।

प्र+प्रकर्षेण दर्शने "प्रेक्षन्ते सर्व्वभूतानि बहुशः पर्व्वसन्धिषु" भा०व०११६५७ । "यत् किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी"भा०व०मनुः। "उदायुधानापततस्तान् दृप्तान् प्रेक्ष्य राघवः"रघुः । "पुनः प्रेक्ष्य च शूलिनम्" कुमा०।

अभि+प्र+आभिमुख्येन दर्शने ।"प्राचीं दिशमभिप्रेक्ष्य महर्षिरिदमब्रवीत्" भा० व०१६३अ० । "दह्यमानमभिप्रेक्ष्य स्त्रियस्ताः संप्रदुद्रुवुः" भा०व०८८अ० ।

उत्+प्र+उत्प्रेक्षायां किञ्चिद्धर्म्मसाधर्म्येणान्यस्यान्यरूपता कल्पने उद्भावने च । "उत्प्रेक्षामोक्षयं तावन्मतिमन्तं विभीषणम्"रामा०।"तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिन सान्"अमरुश०। "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना"सा०द०।"अलङ्कारशब्दे३८५पृष्ठे विवृतिः।

सम्+प्र+सम्यग्दर्शने । "संप्रेक्ष्य नासिकाग्रं स्वम्" गीता "योगक्षेमं च संप्रेक्ष्य वणिजोदापयेत् करम्" मनुः ।

अभि+सम्+प्र+आभिमुख्येन सम्यग्दर्शने ।"अभिसंप्रेक्ष्य भर्त्तारं क्रुद्धा वचनमब्रवीत्" भा० आदि० प०३०११ ।

प्रति+अनुरोधे अपेक्षायां पूजने च ।"प्रतीक्ष्यं तत् प्रतीक्ष्यायै पितृस्वस्रे प्रतिश्रुतम्" माघः "प्रथमं संस्थिता भार्य्या पतिं प्रेत्य प्रतीक्षते" भा०आ० ३०२२ । नाभिनन्देत मरणं नाभिनन्देत जीवितम् । कालमेव प्रतीक्षेत" मनुः ।"संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः" मनुः ।

सम्+प्रति+सम्यक्प्रतीक्षायाम् "मुहूर्त्तं संप्रतीक्षस्व" भा० आ० २९०३ । "एकवेणीधरा हि त्वां नगरी संप्रतीक्षते" रामा० ।

वि+विशेषेण दर्शने ।"वीक्षन्ते त्वां विस्मिताश्चैव सर्वे"गीता । "सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्य्ययम्" मनुः । "जड़ीकृतस्त्र्यम्बकवीक्षणेन" रघुः ।

अनु+वि+सन्ततवीक्षणे पश्चाद्वीक्षणे च । "तस्माद्दिशोऽनुवीक्षमाणोजपति" शत०ब्रा० ५,२,१,२५ ।

अभि+वि+आभिमुख्येन वीक्षणे।"नचैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम्" मनुः ।

उद्+वि+ऊर्द्ध्ववीक्षणे।"उद्वीक्षमाणा भर्त्तारं सुखेन परिशुष्यता" रामा० "पतिव्रतामिमां साध्वीं तवोद्वीक्षितुमच्युत" भा० अनु० २अ० "उद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः" रघुः ।

सम्+उद्+वि+समन्तादुद्वीक्षणे "निषेदुर्भूमिपाः सर्वे समुद्वीक्ष्य परस्परम्" रामा० ।

प्रति+वि+प्रतिदर्शने यत्कर्त्तृकं स्वदर्शनं तस्य स्वेन दर्शने । "ततः स राजा प्रतिवीक्ष्य ताः स्त्रियः" रामा० ।

सम्+वि+सम्यग्वीक्षणे ।

सम्+सम्यग्दर्शने पर्य्यालोच्य दर्शने । "पुरस्तादेव प्रतीचे समीक्षमाणायानुब्रूयात्" शत०ब्रा० ११,५,४,१४ । "समीक्ष्य वसुधां चरेत्" मनुः । "अग्रहस्तमुसक्तेन शीकरेण स नागराट् । समैक्षत गुडाकेशम्" भा० आश्व०२२३१श्लो०।"तान् समीक्ष्य स कौन्तेयः सर्व्वान् बन्धूनवस्थितान्" गीता "उचितमेवैतत्समीक्ष्यक्रमतान्मा-